पत्यै गर्गा॰ यञ्। बार्हद्गत्य तदपत्ये तस्य छात्राः कण्वा॰ अण् यलोपः। बार्हद्ग तस्य छात्रेषु ब॰ व॰ सि॰कौ॰। [स्त्रियां जात्यत्वात् ङीष्।

बृ(वृ)हदङ्ग पुंस्त्री ६ब॰। १गजे शब्दच॰ २महाकाये त्रि॰।

बृ(वृ)हदम्बालिका स्त्री कुमारानुचरमातृभेदे भा॰श॰४७अ॰

बृ(वृ)हदम्ल पु॰ बृहन् अम्लो रसोऽस्य। (कामराङ्गा) कामरङ्गे शब्दच॰। [नृपभेदे हरिवं॰११अ॰।

बृ(वृ)हदश्व पु॰ १ऋषिभेदे भा॰व॰५२अ॰। २श्रावस्तस्य पुत्रे

बृहदारण्यक न॰। उपनिषद्भेदे।

बृहदिषु पु॰ आजमीढपुत्रे १नृपभेदे हरिवं॰२०अ॰। हर्य्यश्ववंश्ये २नृपभेदे च ६२ अ॰।

बृ(वृ)हदुक्थ न॰ कर्म॰। १महति उक्थे २अग्निवंश्ये तपसः पुत्रे ३अग्निभेदे पु॰ भा॰ व॰ २१९ अ॰। "बृ(वृ)हदुक्थोह वै वामदेव्यः" शत॰ ब्रा॰ १।२।२।१४। तदुक्थेन साध्ये ४यज्ञे अश्वमेधे पु॰। [वेददीपे दृश्यम्।

बृ(वृ)हदुक्ष पु॰ १जगत्सृष्टिकारके २प्रजापतौ च यजु॰८।८।

बृ(वृ)हदुत्तरतापनी स्त्री कर्म॰। उपनिषद्भेदे।

बृ(वृ)हदेला स्त्री कर्म॰। स्थूलैलायां राजनि॰।

बृ(वृ)हद्गर्भ पु॰शिविनृपपुत्रे यो हि ब्राह्मणभोजनार्थं प्रमाप्य संस्कृतः पुनरपि जीवितः तत्कथा भा॰ व॰ ११७ अ॰।

बृ(वृ)हद्गु पु॰ राजभेदे भा॰ आ॰ ६अ॰।

बृ(वृ)हद्(गु)गृह पु॰ कारूषदेशे हेमच॰ स च देशः विन्ध्यपर्वतस्य पश्चात्स्थमालवदेशसमीपे स्थितः (वृहद्गुह) इति त्रिकाण्डशेषः। [शब्दच॰।

बृ(वृ)हद्गोल न॰ नित्यक॰। (तरमुज) फलप्रधानवृक्षे

बृ(वृ)हद्धर्म पु॰ कक्षेयुवंश्ये नृपभेदे हरिवं॰ ३२अ॰।

बृ(वृ)हद्दल पु॰६ब॰। १हिन्ताले २पट्टिकालोध्रे च राजनि॰।

बृ(वृ)हद्द्युम्न पु॰नृपभेदे भा॰व॰१३८अ॰ [महाद्युतियुते त्रि॰

बृ(वृ)हद्धनुस् पु॰ आजमीढवंश्ये नृपभेदे हरिवं॰ २०अ॰।

बृ(वृ)हद्धर्मन् पु॰ आजमीढवंश्ये नृपभेदे। हरिवं॰२०अ॰।

बृ(वृ)हद्धर्मपुराण न॰ उपपुराणभेदे।

बृ(वृ)हद्धन त्रि॰ बृहत् धनमस्य। १महाधने २इक्ष्वाकुवंश्ये नृपभेदे पु॰ हरिवं॰१५अ॰।

बृ(वृ)हद्बल न॰ कर्म॰। महाबाहुबले त्रिका॰।

बृ(वृ)हद्ब्रह्मन् पु॰आङ्गिरसे ऋषिभेदे।"ब्रह्मणो यस्तृतीयस्तु पुत्रः कुरुकुलोद्वह!। तस्याभवन् सुता भार्य्या प्रजावतां च मे शृणु। बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः। बृहन्मन्त्रो बृहद्भासस्तथा राजन्! बृहस्पतिः" भा॰व॰ २१७ अ॰। बृहज्ज्योतिरादयस्तत्पुत्रे

बृ(वृ)हद्भट्टारिका स्त्री॰ कर्म॰। दुर्गायां शब्दमाला।

बृह(वृ)द्भय पु॰ सावर्णिमनोः पुत्रभेदे मार्कण्डेयपु॰९१अ॰।

बृ(वृ)हद्भानु पु॰ ६ब॰। १अग्नौ २चित्रकवृक्षे च अमरः। ३आङ्गिरसे वह्निभेदे भा॰व॰ २२०। इन्द्रसावर्णिमन्वन्तरे ४हरेरवतारभेदे भाग॰ ८।१३ अ॰

बृ(वृ)हद्रण पु॰इक्ष्वाकुवंश्ये भाविनि नृपभेदे भाग॰९।१२।६।

बृ(वृ)हद्रथ पु॰ मौर्य्ये १नृपभेदे भाग॰१२।१। २आङ्गिरसे वह्नेः पुत्रभेदे भा॰२१९ ३मागधराजभेदे जरासन्धताते हरिवं॰३अ॰। ४चेदिराजवसोःपुत्रभेदे हरिवं॰ ११७अ॰।

बृ(वृ)हद्रथन्तर न॰ सामभेदे १आङ्गिरसवंश्ये वह्निभेदे भा॰व॰२१९अ॰।

बृ(वृ)हद्राज पु॰ इक्ष्वाकुवंश्ये भाविनि नृपभेदे भाग॰ ९।१२

बृ(वृ)हद्राविन् पु॰ बृहत् यथा तथा रौति रु-णिनि। क्षुद्रोलूके राजनि॰।

बृ(वृ)हद्रूप पु॰ मरुद्गणभेदे हरिवं॰ २०४ अ॰।

बृ(वृ)हद्वत् पु॰ बृहत् बृहत्साम तदस्त्यस्य स्तोत्रतया मतुप् मस्य वः। बृहत्सामस्तोत्रस्तुत्ये इन्द्रे मनु॰७।२२ २तत्साध्ये यज्ञे च ३नदीभेदे स्त्री ङीप् भा॰भी॰९अ॰।

बृ(वृ)हद्वल्क पु॰ ६ब॰। पट्टिकालोध्रे राजनि॰।

बृ(वृ)हद्व्रात पु॰७ब॰। अश्मरीहरे धान्यभेदे (देधान) रत्नमा॰

बृ(वृ)हद्वारुणी स्त्री कर्म॰। महेन्द्रवारुण्याम् राजनि॰।

बृ(वृ)हद्बीज ६ब॰। महास्थियुते आम्रातवृक्षे शब्दच॰।

बृ(वृ)हन्नल पु॰ बृहन्नलेति आख्यातत्वेन अस्त्यस्य अच्। अर्जुने हेमच॰ "आदाय प्रययौ वीरः स बृहन्नलसारथिः" भा॰ वि॰३७अ॰। "अर्जुन उवाच। प्रतिज्ञां षण्ढकोऽस्मीति करिष्यामि महीपते!। ज्याघातौ हि महान्तौ मे संवर्त्तुं नृप! दुष्करौ। वलयैश्छादयिष्यामि बाहू किणकृताविमौ। कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे। पिनद्धकम्बुः पाणिभ्यां तृतीयां प्रकृतिं गतः। वेणीकृतशिरा राजन्! नाम्ना चैव बृहन्नला" इति तस्य च अज्ञातवासकाले तथाख्यत्वम् भा॰वि॰ १२अ॰ उक्तम्।

बृहन्नारदीय न॰ उपपुराणभेदे।

बृहन्नारायणोपनिषद् स्त्री॰उपनिषद्भेदे। [शब्दे दृश्यम्।

बृहन्नौका स्त्री॰ चतुरङ्गशब्दोक्ते क्रीडनभेदे। चतुरङ्ग-

बृहस्पति पु॰ बृहत्या वाचः पतिः पारस्करा॰सुडादिः बृहतीपतिशब्दे दृश्यम्। आङ्गिरसे १मुनिभेदे बृहद्ब्रह्मन्शब्दे दृश्यम्। २देवपुरोहिते ३ग्रहभेदे च। तस्य गतिभग-